"नगुर्भेदादि गन्धर्व्वा नवश्च नटसुतगु: ।"
इयं हि पञ्चमकारपूज्यकुलनायिकान्तर्गता ।
यथा, तन्त्रसारे ।
"नटी कापालिनी वेश्या रजकी नापिताङ्गना ।
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका ।
मालाकारस्य कन्या च नव कन्याः प्रकी-
र्त्तिताः ॥")

नटेश्वरः, पुं, ( नटानामीश्वरः । नृत्यप्रियत्वात् तथात्वम् । ) शिवः । इति हेमचन्द्रः ।२।११२ ॥

नड़, क भ्रंशे । इति कविकल्पद्रुमः ॥ ( चुरा-परं-अकं सेट् । ) क, नाड़यति । भ्रंशोऽधःपतनम् । इति दुर्गादासः ॥

नड़ः, पुं, (नलतीति । नल + अच् । लस्य ड़त्वम् ।) नलतृणम् । इत्यमरः । २ । ४ । १६५ ॥ (यथा, वेदे । ६ । १३८ । ५ ।
"यथा नडं कशिपुने स्त्रियो भिन्दन्त्यश्मना ॥")
जातिभेदः । इति पुंगपुंसकसंग्रहटीकायां मथु-राथवेशः ॥

नड़कीयः, त्रि, ( नडाः सन्त्यत्र । नड़ + "नड़ा-दीनां कुक् च ।" ४ । २ । ६१ । इति छः कुगागमश्च । ) नलसमूहदेशः । इति हेम-चन्द्रः । ४ । २० ॥

नड़प्रायः, त्रि, ( नड़ः प्रायेण यत्र । ) नलबहुल-देशः । तत्पर्य्यायः । नड़कीयः २ नड्वान् ३ नड्वलः ४ । इति हेमचन्द्रः । ४ । २० ॥

नड़मीनः, पुं, ( नलस्थितो मीनः । लस्य ड़त्वम् । ) चिलिचिममत्स्यः । नलमीन इत्यमरदर्शनात् ड़लयोरैक्यम् ॥

नड़संहतिः, स्त्री, ( नड़ानां संहतिः समूहः । ) नड़समूहः । तत्पर्य्यायः । नड्या २ । इत्य-मरः । २ । ५ । १६८ ॥ नड़चयः ३ । इति शब्दरत्नावली ॥

नड़हः, त्रि, ( नड़ं अपरिष्कृतस्थानं हन्तीति । हन + डः । ) कान्तः । ललितः । इति भूरि-प्रयोगः ॥

नड्या, स्त्री, ( नड़ानां समूहः । "पाशादिभ्यो यः ।" ४ । २ । ४९ । इति यः । ) नड़समूहः । इत्यमरः । २ । ५ । १६८ ॥

नड्वलः, त्रि, ( नड़ाः सन्त्यत्र । नड़ + "नड़-शादात् ड्वलच् ।" ४ । २ । ८८ । इति ड्वलच् ।) नलबहुलदेशः । इत्यमरः । २ । १ । ९ ॥ (यथा, रघुः । १८ । ५ ।
"यो नड्वलानीव गजः परेषां
बलान्यमृद्नान्नलिनाभवक्त्रः ॥" )

नड्वान्, [त्] त्रि, ( नड़ाः सन्त्यत्र । नड़ + "कुमुद-नड़वेतसेभ्यो ड्मतुप् ।" ४ । २ । ८७ । इति ड्मतुप् । डित्वात् टिलोपः । मस्य वः । ) नल-बहुलदेशः । इत्यमरः । २ । १ । ९ ॥

नड्वाभूः, स्त्री, कुट्टिमः । इति भूरिप्रयोगः ॥

नतं, क्ली, ( नम + क्तः । ) तगरपादी । तगर-मूलम् । इति मेदिनी । ते, २९ ॥ ( पर्य्यायो-ऽस्य यथा,—
"कालानुसारिवावक्रं तगरं कुटिलं शठम् ।
महोरगं नतं जिह्मं दीनं तगरपादिकम् ॥"
इति वैद्यकरत्नमालायाम् ॥ )

नतः, पुं, ( नमति स्मेति । नम + क्तः । ) जन्म-नाड़िकाविशेषः । तद्यथा,—
"अथ जन्मतृकर्म्मख्या येन यान्ति दृक्तुल्यतां दिवि ।
नतोन्नतौ ततः साध्यौ भावाः खेटबलानि षट् ॥
दिनार्द्धान्तरिता जन्मनाड़िका नतनाड़िका ।
पूर्व्वापरार्द्धे जातस्य प्राक्परास्या दिने भवेत् ॥
रात्रेर्गतघटीशेषघटीदिनार्द्धसंयुता ।
परपूर्व्वाभिधा ज्ञेया रजन्यां नतनाड़िका ॥"
इति कोष्ठीप्रदीपः ॥

नतः, त्रि, ( नम + क्तः । ) कुटिलः । नम्रः । इति मेदिनी । ते, २९ ॥ ( यथा, हरिवंशे । २०१ । ३९ ।
"पतन्ति युगपत् सर्व्वे पादयोर्मूर्द्धभिर्नताः ॥" )

नतद्रुमः, पुं, ( नतो द्रुमः । ) नताम्रातः । इति रत्नमाला ॥

नतनासिकः, त्रि, ( नता नासिका यस्य । ) अवन-नासिकायुक्तः । खाँदा इति भाषा । तत्-पर्य्यायः । अवटीटः २ अवनाटः ३ अवभ्रटः ४ । इत्यमरः । २ । ६ । ४५ ॥

नताङ्गी, स्त्री, ( नतमङ्गमस्याः । ङीष् । ) नारी । इति राजनिर्घण्टः ॥

नतिः, स्त्री, ( नम + भावे क्तिन् । ) नमनम् । नम्रता । यथा,—
"नीतिर्भूमिभुजां नतिर्गुणवतां ह्रीरङ्गनानां धृति-र्दम्पत्योः शिशवो गृहस्य कविता बुद्धेः प्रसादो गिराम् ।
लावण्यं वपुषः स्मृतिः सुमनसः शान्तिर्द्विजस्य क्षमा
शक्तस्य द्रविणं गृहाश्रमवतां स्वास्थ्यं सतां मण्ड-नम् ॥"
इति नवरत्नम् ॥
( नतिलक्षणादिकन्तु नमस्कारशब्दे द्रष्टव्यम् । )

नद, टु द संश्रधि । इति कविकल्पद्रुमः ॥ ( भ्वा-परं-अकं-सेट् । ) टु, नन्दथुः । द, नन्दते । संश्रधि आनन्दयुक्तभावे । ननन्द पारिप्लव-नेत्रया नृपः । नन्दते च कुलं पुंसाम् । इति गणकृतानित्यत्वात् । इति दुर्गादासः ॥

नदः, पुं, ( नदति प्रवाहवेगेन शब्दायते इति । नद + अच् । ) पुंवाचकाख्यनिमन्नाताव्छिन्न-जलप्रवाहः । ( यथा, मनुः । ६ । ९० ।
"यथा नदीनदाः सर्व्वे सागरे यान्ति संस्थितिम् ।
तथैवाश्रमिणः सर्व्वे गृहस्थे यान्ति संस्थितिम् ॥")
स च सिन्धुभैरवशोणदामोदरब्रह्मपुत्रादिः । तत्पर्य्यायः । पुनर्भवः २ भिद्यः ३ उद्यः ४ सरस्वान् ५ । इति हेमचन्द्रः । ४ । १५६ ॥
"अष्टषष्टिस्तु तीर्थानि नदाश्च दशकोटयः ॥"
इति पाद्मे भूखण्डे ८५ अध्यायः ॥

नदथुः, पुं, ( नदतीति । नद + "ट्वितोऽथुच् ।" उणां ३ । ५२ । इति अथुच् । ) मेघः । इत्यु-णादिकोषः ॥ ( यथा ऋग्वेदे । ८ । २१ । १४ ।
"यदा कृणोषि नदनुं समूहस्यादित् पितेव हूयसे ॥" )
सिंहः । इति शब्दमाला ॥ (नद + भावे अनुङ् । शब्दः । यथा, ऋग्वेदे । ६ । १८ । २ ।
"स युध्मः सत्वा खजकृत्समद्वा
तुविम्रक्षो नदनुमाँ ऋजीषी ॥" )

नदी, स्त्री, ( नदतीति । नद + अच् । पचादिगणे नदट् इति निर्द्देशात् टित्त्वात् ङीप् । ) अष्ट-सहस्रधनुरन्यूनव्याप्ततोया । सा च गङ्गायमुना-सरस्वतीकावेरीगोदावरीप्रभृतिः । तस्या लक्ष-णमाह छन्दोगपरिशिष्टम् ।
"धनुःसहस्राण्यष्टौ च गतिर्यासां न विद्यते ।
न ता नदीशब्दवहा गर्त्तास्ताः परिकीर्त्तिताः ॥"
इति तिथितत्त्वम् ॥
तत्पर्य्यायः । सरित् २ तरङ्गिणी ३ शैवलिनी ४ तटिनी ५ ह्रदिनी ६ धुनी ७ स्रोतस्वती ८ द्वीपवती ९ स्रवन्ती १० निम्नगा ११ आपगा १२ । इत्यमरः । १ । १० । ३० ॥ ह्रादिनी १३ धुनिः १४ स्रोतस्विनी १५ स्रोतोवहा १६ सागरगामिनी १७ अपगा १८ । इति भरतः ॥ निर्झरिणी १९ सरस्वती २० समुद्रगा २१ कूलङ्कषा २२ कूल-वती २३ शैवालिनी २४ सिन्धुः २५ समुद्र-कान्ता २६ सागरगा २७ ह्लादा २८ रोधो-वती २९ वाहिनी ३० । तज्जलगुणाः । स्वच्छ-त्वम् । लघुत्वम् । दीपनत्वम् । पाचनत्वम् । रुच्यत्वम् । तृष्णापहत्वम् । पथ्यत्वम् । मधु-रत्वम् । ईषद्वातलत्वञ्च ॥ * ॥
"सर्व्वा गुर्व्वी प्राङ्मुखी वाहिनी स्या-
ल्लघ्वी पश्चाद्वाहिनी निश्चयेन ।
देशे देशे तद्गुणा या विशेषा-
न्नैषा धत्ते गौरवं लाघवञ्च ॥
प्रायो मृदुवहा गुर्व्वी लघ्वः शीघ्रवहाः स्मृताः ।
नद्यः पाषाणसिकतावाहिन्यो विमलोदकाः ॥
हिमवत्प्रभवा याश्च जलं तास्वमृतोपमम् ॥
विन्ध्यात् प्राची प्राच्यवाची प्रतीची
या चोदीची स्यान्नदी सा क्रमेण ।
वातारोग्यं श्लेष्मपित्तार्त्तिलोपं
पित्तोद्रेकं पथ्यपाकञ्च धत्ते ।
पारियात्रभवा याश्च विन्ध्याद्रिप्रभवाश्च याः ।
शिरोहृद्रोगकुष्ठानां ता हेतुः श्लीपदस्य च ॥"
इति राजनिर्घण्टः ॥
( यथा च ।
"तथा प्राच्यां गमाश्चान्याः पश्चिमानुगमास्तथा ।"
"सत्येकता समायाता द्विविधा चानुवाहिनी ।
एवं चतुर्व्विधा नद्यो वातपित्तकफात्मिकाः ॥
सदावहा याश्च नवद्यसुर्व्वां
मरुत्कफानां प्रशमश्च तस्याः ।
नीरं वसन्ते हितकृद्विशेषात्
नदीभवं नैव हिमागमे च ॥
घनविमलशिलानां स्फालनान्यान्यवीर्णं
बहुलसजलवीचिच्छन्नसंक्षोभदम् ।